प्रवेश सं० १८२३६ विषयः पुराणेतिहासम्
क्रम सं०

नाम भागवतम् (द्वादश स्कन्धः) ग्रन्थकार

पत्र सं० 1-24, (१-१३ अध्यायः)

श्लोक सं० अक्षर सं० (पंक्तौ) ५२ पंक्ति सं० (पृष्ठे) ९

आकार: १४" × ५.६" लिपि: दे० ना० आधार: पत्र

वि० विवरणम् पू०

14437

पी० एस० यू० पी०—७७ एस० सी० ई०—१९५१—५० ०००

नं. ३८५१

Indira Gandhi National Centre for the Arts

महोन्दरसंगहे—
३०७

Indira Gandhi National
Centre for the Arts

मा·पु [illegible] स्वधामानुगते कृष्णे पड्वंशविभवः कस्य वंशो भवत्येष्यमेतदाचक्ष्व मे मुने ॥ श्री पराशर उवाच ॥ योऽयं रिपुंजयो
५३ नाम भविष्यो वार्हद्रथः तस्यामात्यस्सुनको हत्वा स्वामिनमात्मजं प्रद्योतसंज्ञं राजानं कर्त्ता य त्तालकः सुतस्ततो विशाखयूप
स्तत्पुत्रो भविता राजकस्ततः नंदिवर्द्धनस्तत्सुतः पंचप्रद्योतनाइमे अष्टत्रिंशोत्तरं शतं भोक्ष्यंति पृथिवीं नृपाः १ ततः शिशुनाग
स्ततोभाव्यः काकवर्णस्ततस्सुतः क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेत्रधर्मजः ३ विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति दर्भ
कस्तत्सुतो भावी दर्भकस्याजयः सुतः नंदिवर्द्धन आजेया महानंदि सुतस्ततः ४ शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयं
समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कर्षोन्नृपाः ५ महानंदिसुतो राजन्शूद्रागर्भोद्भवो बली महापद्मपतिः कश्चिन्नंदः
क्षत्रविनाशकृत ६ ततो नृपा भविष्यंति शूद्रप्रायास्त्वधार्मिकाः ७ स एकच्छत्रां पृथिवीमनुल्लंघितशासनः शासिष्यति ॥एप॥
महापद्मो द्वितीयस्त्व भार्गवः ८ तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः यद्यंगाभोक्ष्यंति महीराजानः स्म शतं समाः ॥९॥
९ नवनंदान्द्विजः कश्चित्प्रपन्नानुद्धरिष्यति तेषामभावे जगतीं मौर्या भोक्ष्यंति वै कलौ १० स एव चंद्रगुप्तं वै द्विजो

राज्येभिषेक्ष्यति ११ तस्यापि बिंदुसारस्ततश्चाशोकवर्द्धनः सुयशाभविता तस्य संगतः सुयशाः सुतः १२ शालिशूकस्ततस्त
स्य सोमशर्मा भविष्यति शतधन्वा ततस्तस्य भविता तद्बृहद्रथः १३ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं समा भोक्ष्यंति पृ
थिवीं कलौ कुरुकुलोद्वह १४ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः वसुमित्रो भद्रकश्च पुलिंदो भविता सुतः १५
ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ततो भागवतस्तस्माद्देवभूतिः कुरूद्वह १६ शुंगा दशैते भोक्ष्यंति भूमिं वर्ष
शताधिकं ततः कण्वानियं भूमिर्यास्यत्यन्यगुणान्नृप १७ शुंगं हत्वा देवभूतिं कण्वोमात्यस्तु कामिनं स्वयं करि
ष्यते राज्यं वसुदेवो महामतिः १८ तस्य पुत्रस्तु भूमिपुत्रस्तस्य नारायणः सुतः १९ कण्वायना इमे भूमिं चत्वारिंशच्च पंच
च ॥ शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे २० हत्वा काण्वं वसुशर्माणां तद्भृत्यो वृषलो बली गां भोक्ष्यत्यन्ध्रजातीयः
कंचित्कालमसत्तमः २१ कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः श्रीशांतकर्णिस्तत्पुत्रः पौर्णमासस्ततस्तु ततः २२
लंवोदरस्ततस्तत्पुत्रस्तस्माच्चिविलिको नृपः मेघस्वातिश्चिविलिकादटमानस्ततस्य च २३ अनिष्टकर्मा हालेयस्तल

Indira Gandhi National Centre for the Arts

॥भा.द्वा.
१२

कन्तस्य चात्मजः पुरीषभेदस्ततस्तस्मात्तो राजा सुनंदनः २४ चकोरो वटकोयत्र शिवस्वातिररिंदम तस्यापि गोमतीपुत्रः पुरीमान्भविता
ततः २५ एते त्रिंशन्नृपतयश्चत्वार्यब्दशतानि च षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन २६ मेदशिराः शिवस्कंदो यज्ञश्रीस्त
त्सुतस्ततः विजयस्तत्सुतो भाव्यश्चंद्रविज्ञः सलोमधिः २७ सप्ताभीरा आवभृत्या दश गर्दभिनो नृपाः कंकाः षोडश भूपाला
भविष्यंति चलोलुपाः २८ ततोष्टौ यवना भाव्यास्तुर्दश तुरुष्ककाः भूयो दश गुरुंडाश्च मौना एकादशैव तु २९ एते भोक्ष्यंति पृथ्वि
वीं दश वर्षशतानि च नवाधिकां च नवतिं मौना एकादश क्षितिं भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः किलिकिलायां नृ
पतयो भूतनंदोथ वंगिरिः शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः इत्येते वर्षशतं भविष्यंत्यधिकानि षट् ३० तेषां त्रयोदश
सुता भवितारश्च वाल्हिकाः पुष्यमित्रोथ राजन्यो दुर्मित्रोस्य तथैव च ३१ एककाला इमे भूपाः सप्तांध्राः सप्तकोशलाः वै ॥एम॥
दूर्य्यपतयो भाव्या नैषधास्तत एव हि ३२ मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः करिष्यत्यपरो वर्णान्पुलिंदयदुमद्रकान् प्र १२
जाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ३३ वीर्यवान्क्षत्रमुत्साद्य पद्मवत्यां स सर्वपरि अनुगंगामाप्रयागं गुप्तां भोक्ष्यति

मेदिनीं ३४ सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः व्रात्या द्विजा भविष्यंति शूद्रप्राया जनाधिपाः ३५ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंड
लं भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ३६ तुल्यकाला इमे राजन्म्लेच्छप्रायाश्च भूभृतः एतेऽधर्मानृतपराः फल्गुदास्तीव्र
मन्यवः स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः असंस्कृताः क्रियाहीना रजसा तम
सावृताः प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ३७ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः अन्योन्यतो राजभिश्च क्षयं या
स्यंति पीडिताः ३८

ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः १ वित्तमेव कलौ नृणां जन्मा
चारगुणोदयः धर्मन्यायव्यवस्थायां कारणं बलमेव हि २ दांपत्येभिरुचिर्हेतुर्मायैव व्यावहारिके स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्र
त्वे सूत्रमेव हि लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणं ॥ अवृत्त्या न्यायदौर्बल्यं पांडित्ये चापलं वचः अनाढ्यतैवासाधुत्वे
साधुत्वे दंभ एव तु स्वीकार एव चो॥ अवृत्त्यां न्यायदौर्बल्यं पांडित्ये चापलं वचः॥ अनाढ्यतैवासाधुत्वे साधुत्वे दंभ एव तु स्वीकार

Indira Gandhi National
Centre for the Arts

द्वा० हेत्वलानमेवचप्रसाधनं ३ दूरेवार्ष्ययनंतीर्थंलावण्येकेशधारणं उदरंभरतास्वार्थः सत्यत्वेधार्ष्ट्यमेवहि दाक्ष्यंकुटुंबभरणंयशोर्थेधर्मसेव
३ नं ४ एवंप्रजाभिर्दुष्टाभिराकीर्णेक्षितिमंडले ब्रह्मविट्क्षत्रशूद्राणांयोवलीभविता नृपः ५ प्रजाहिलुब्धैराजन्यैर्निर्घृणैर्दस्युधर्मभिः।
आछिन्नदारद्रविणायास्यंतिगिरिकाननं शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ६ अनावृष्ट्याविनंक्ष्यंतिदुर्भिक्षकरपीडिताः॥
शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः क्षुत्तृड्भ्यांव्याधिभिश्चैवसंतापेनचचिंतया ७ त्रिंशद्विंशतिवर्षाणिपरमायुः कलौनृणां ८
क्षीयमाणेषुदेहेषुदेहिनांकलिदोषतः वर्णाश्रमवतांधर्मेनष्टेवेदपथेनृणां १ पाषंडप्रचुरेधर्मेदस्युप्रायेषुराजसु चौर्यानृतवृ
थाहिंसानानावृत्तिषुवैनृषु २ शूद्रप्रायेषुवर्णेषुछागप्रायासुधेनुषु गृहप्रायेष्वाश्रमेषुयौनप्रायेषुबंधुषु ३ अणुप्रायास्वौ
षधीषुशमीप्रायेषुस्थास्नुषु विद्युत्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु ४ इत्थंकलौगतप्रायेजनेषुखरधर्मिषु धर्मत्राणायसत्त्वेनभ एम:
गवानवतरिष्यति ९ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः धर्मत्राणायसाधूनांजन्मकर्मापनुत्तये १० शंभलग्राममुख्य ३
स्यब्राह्मणस्यमहात्मनः भवनेविष्णुयशसः कल्किः प्रादुर्भविष्यति ११ अश्वमाशुगमारुह्यदेवदत्तंजगत्पतिः असिनासाधु

दमनमष्टैश्वर्यगुणान्वितः ।विचरन्नाशुनाक्षौण्यांहयेनाप्रतिमद्युतिः नृपलिंगछदोदस्यून्कोटिशोनिहनिष्यति १२ अथतेषांभविष्यंतिमनां
सिविशदानिवै वासुदेवांगरागातिपुण्यगंधानिलस्पृशां पौरजानपदानांवैहतेष्वखिलदस्युषु १३ तेषांप्रजाविसर्गश्चस्थविष्ठःसंभ
विष्यति॥ वासुदेवेभगवतिसत्वमूर्तौहृदिस्थिते १४ यदावतीर्णोभगवानकल्किर्धर्मपतिर्हरिः ॥कृतंभविष्यतितदाप्रजासूतिश्चसात्विकी
॥१५॥यदाचंद्रश्चसूर्यश्चतथातिष्यबृहस्पती एकराशौसमेष्यंतितदाभवतितत्कृतं ॥१६॥ये ऽतीतावर्तमानायेभविष्यंतिचपार्थि
वाः॥तेतउद्देशतः प्रोक्तावंश्याः सोमसूर्ययोः ॥१७॥ आरभ्यभवतोजन्मयावन्नंदाभिषेचनं॥एतद्वर्षसहस्रंतुशतंपंचदशोत्तरं॥१८॥सप्त
र्षीणांतुयौपूर्वौदृश्येतेउदितौदिवि॥तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि तेनैतऋषयोयुक्तास्तिष्ठंत्यब्दशतंनृणां॥१९॥तेत्वदीये
द्विजाः कालेअधुनाचाश्रितामघाः॥२०॥विष्णोर्भगवतोभानुःकृष्णाख्योसौदिवंगतः ॥तदाविशत्कलिर्लोकंपापेयद्रमतेजनः॥२१॥
यावत्सपादपद्माभ्यांस्पृशन्नास्तेरमापतिः तावत्कलिर्वैपृथिवीपराक्रांतुंनचाशकत्॥२२॥यदादेवर्षयः सप्तमघासुविचरंतिहि
तदाप्रवृत्तस्तुकलिर्द्वादशाब्दशतात्मकः॥२३॥यदामघाभ्योयास्यंतिपूर्वाषाढांमहर्षयः। तदानंदात्प्रभृत्येषकलिर्वृद्धिंगमिष्यति॥२४॥

Indira Gandhi National
Centre for the Arts

भा॰टू॰ यस्मिन्नहस्योदिवं यातस्तस्मिन्नेव तदाहनि।प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः २५ दिव्याब्दानां सहस्राणि चतुर्थे तु पुनः कृतं भविष्य
४ ति तदा नृणां मन आत्मप्रकाशकं २६ इत्येष मानवो वंशो यथा संख्यायते भुवि तथा विट्शूद्रविप्राणां तास्ता ज्ञेया युगे युगे २७ एते
षां नामलिंगानां पुरुषाणां महात्मनां तथा मात्रावशिष्टानां कीर्तिरवस्थिता भुवि २८ देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः क
लापग्राममास्याते महायोगबलान्वितौ २९ नाविहेत्य कलेरंते वासुदेवानुशिक्षितौ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ३० कृ
तं त्रेता द्वापरं च कलिश्चेति चतुर्युगं अनेन क्रमयोगेण भुवि प्राणिषु वर्तते ३१ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे भूमौ ममत्वं
कृत्वां ते हित्वेमां निधनं गताः ३२ कृमिविड्भस्मसंज्ञां ते राजनाम्नोऽपि यस्य च भृतभ्रककृतन्त्वं ते स्वार्थं किं वेद निरयो यतः ३३ कथं मे
पृथुमखुंगभूः पूर्वैर्मे पुरुषैर्धृता मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य च ३४ तेजोवन्नमयं गेहीत्वात्मनयावुधाः महीममत
याचोभो हित्वा तेऽदर्शनं गता ३५ येये भूपतयो राजन् भुंजंति भुवमोजसा कालेन ते कृताः सर्वे कथामात्राः कथासु च ३६

जपेयथा नरपानहसतिभूरियं अहो मा विजिगीषंति मृत्योः क्रीडनकान्नृपाः १ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि येन के नोप
मे पिंडेयेऽतिविस्तमितान्नृपाः २ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः ततः सचिवपौरानकान्नूनं सकंठकान् ३ एवं क्रमेण जे
ष्यामः पृथ्वीं सागरमेखलां इत्याशावद्धुत्तुंदयानपश्यंसंतिकें तकं ४ समुद्रावरणांजित्वा मां विशंत्यब्धिमोजसा कियदात्मजय
स्पैतन्मुक्तिरात्मजये फलं ५ यां विसृज्यैव मनवस्तत्सुतास्त्वकृहदह गता यथागतं पुढतां मां जेष्यंत्यबुद्धयः ६ मत्कृते पितृपुत्राणां
भ्रातृणां चापि विग्रहः जायतेऽत्यंतमतां राज्ये ममतावद्धचेतसां ७ ममैवेयं मही कृत्स्ना न तेमह्तिवादिनः स्पर्द्धमाना मियो भ्रंति
म्रियंते मत्कृते नृपाः ८ पृथुः पुरूरवा गाधिर्नहुषो भरतोर्जुनः मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः तृणविंदुर्ययातिश्च
शर्यातिः शांतनुर्गयः भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नगः हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः नमुचिः सं
वरो भौमो हिरण्याक्षोऽथ तारकः अन्ये च बहवो देवा राजानो ये ममेश्वराः सर्वे सर्वविदः शूराः सर्वे सर्वजितो जिताः ममतो
मप्पवर्त्तं तत्कृत्वोद्धिर्मेस्वधर्मिणः कथावशेषाः कालेन सुकृतार्थाः कृता विभो ९ कथाश्चमास्तेकथिता महीयसं वितायलो

Indira Gandhi National
Centre for the Arts

भा॰द्वा॰ कैषुयशःपरेयुषां विज्ञानवैराग्यविवक्षयाविभोवचोविभूतीर्नतुपारमार्थ्यं १० यस्तूत्तमश्लोकगुणानुवादः संगीयतेभीक्ष्णममंगलघ्नः त
१५ मेवनित्यंशृणुयादभीक्ष्णंकृष्णेमलांभक्तिमभीप्समानः ११ राजोवाच केनोपायेनभगवन् कलेर्दोषान्कलौजनाः विधमिष्यंत्यु
पचितांस्तन्मेब्रूहियथामुने १२ युगानियुगधर्मांश्चमानंप्रलयकल्पयोः कालस्येश्वररूपस्यगतिंविष्णोर्महात्मनः १३ श्रीशुकः
कृतेप्रवर्त्ततेधर्मश्चतुष्पात्तज्जनैर्धृतः सत्यंदयातपोदानमितिपादाविभोर्नृप १४ संतुष्टाःकरुणामैत्राः शांतादांतास्तिति
क्षवः आत्मारामाःसमदृशःप्रायशःश्रमणाजनाः १५ त्रेतायांधर्मपादानांतुर्यांशोहीयतेशनैः अधर्मपादैरनृतहिंसाऽ
संतोषविग्रहैः १६ तदाक्रियातपोनिष्ठानातिहिंस्रानलंपटाः त्रैवर्गिकास्त्रयीवृद्धावर्णाब्रह्मोत्तरानृप १७ तपःसत्य
दयादानेष्वर्द्धंह्रसतिद्वापरे हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः १८ यशस्विनोमहाशालाःस्वाध्यायाध्ययनेरताः आ राम॰
ढ्याःकुटुंबिनोहृष्टावर्णाःक्षत्रद्विजोत्तमाः १९ कलौतुधर्महेतूनांतुर्यांशोऽधर्महेतुभिः एधमानैःक्षीयमाणोह्यंतेसो १५
पिविनंक्ष्यति २०ति २० तस्मिंल्लुब्धादुराचारानिर्दयाःशुष्कवैरिणः दुर्भगाभूरितर्षाश्चशूद्रदासोत्तराःप्रजाः २१ सत्वंर

जस्तमइतिदृश्यन्तेपुरुषेगुणाः कालसंचोदितास्तेवैपरिवर्त्तंतआत्मनि २२ प्रभवंतियदासत्वेमनोबुद्धींद्रियाणिच तदाकृतयुगंविद्याज्ज्ञाने
तपसियद्रुचिः २३ यदाकर्मसुकाम्येषुभक्तिर्भवतिदेहिनां तदात्रेताऽरजोवृत्तिरितिजानीहिबुद्धिमन् २४ यदालोभस्त्वसंतोषोमानोदंभो
थमत्सरः कर्मणांचापिकाम्यानांद्वापरंतद्रजस्तमः २५ यदामायानृतंतंद्रानिद्राहिंसाविषादनं शोकोमोहोभयंदैन्यंसकलि
स्तामसःस्मृतः २६ यस्मात्क्षुद्रदृशोमर्त्याः क्षुद्रभाग्यामहाशनाः कामिनोवित्तहीनाश्चस्वैरिण्यश्चस्त्रियोसती २७ दस्यू
त्कृष्टाजनपदावेदाःपाषंडदूषिताः राजानश्चप्रजाभक्षाः शिश्नोदरपराद्विजाः २८ अव्रतावटवोशौचाभिक्षवश्चकुटुंबिनः
तपस्विनोग्रामवासान्यासिनोत्यर्थलोलुपाः २९ ह्रस्वकायामहाहाराभूर्यपत्यागतह्रियः शश्वत्कटुकभाषिण्यश्चौर्यमायो
रुसाहसाः ३० पणयिष्यंतिवैक्षुद्राःकिराटाःकूटकारिणः अनापद्यपिमंस्यंतेवार्त्तांसाधुजुगुप्सितां ३१ पतिंत्यक्ष्यंतिनिर्द्रव्यं
तिवैक्षुद्राःकिराटाःकूटकारिणः अनापद्यपिमंस्यंतेवार्त्तांसाधुजु ३२ पितृभ्रातृसुहृज्ज्ञातीन्हित्वासौरतसौहृदाः ननांदृश्या
लसंवादादीनाःस्त्रैणाःकलौनराः ३३ शूद्राःप्रतिग्रहीष्यंतितपोवेषोपजीविनः धर्मंवक्ष्यंत्यधर्मज्ञाअधिरुह्योत्तमासनं ३४

Indira Gandhi National
Centre for the Arts

भा०द्वा० नित्यमुद्विग्नमनसोदुर्भिक्षकरकर्शिताः निरन्नेभूतलेराजन्ननावृष्टिभयातुराः वासोन्नपानशयनव्यवायस्नानभूषणैः हीनाः पिशाचसंदर्शाभविष्यंति
८ कलौप्रजाः ३५ कलौकाकिणिकेप्यर्थेविगृह्यत्यक्तसौहृदाः त्यक्ष्यंतिचप्रियान्प्राणान्हनिष्यंतिस्वकानपि ३६ नरक्षिष्यंतिमनुजाःस्थविरौ
पितरावपि पुत्रान्सर्वार्थकुशलान्क्षुद्राःशिश्नोदरंभराः ३७ कलौनराजन्जगतांपरंगुरुंत्रिलोकनाथानतपादपंकजं प्रायेणमर्त्याभगवं
तमच्युतंयक्ष्यंतिपाषंडविभिन्नचेतसः ३८ यन्नामधेयंम्रियमाणआतुरःपतन्स्खलन्वाविवशोगृणन्पुमान् विमुक्तकर्मार्गलउत्तमां
गतिंप्राप्नोतियक्ष्यंतिनतंकलौजनाः ३९ पुंसांकलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् सर्वान्हरतिचित्तस्थोभगवान्पुरुषोत्तमः
४० श्रुतःसंकीर्तितोध्यातःपूजितश्चादृतोपिवा नृणांधुनोतिभगवान्हृत्स्थोजन्मायुताशुभं ४१ यथाहेम्निस्थितोवह्निर्दुर्वर्णं
हंतिधातुजं एवमात्मगतोविष्णुर्योगिनामशुभाशयं ४२ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः नात्यंतशु राम
द्धिंलभतेंतरात्मायथाहृदिस्थेभगवत्यनंते ४३ तस्मात्सर्वात्मनाराजन्हृदिस्थंकुरुकेशवं म्रियमाणोह्यवहितस्ततोयासिपरांगतिं ८
४४ म्रियमाणैरभिध्येयोभगवान्परमेश्वरः आत्मभावंनयत्यंगसर्वात्मासर्वसंश्रयः ४५ कलेर्दोषनिधेराजन्नस्तिह्येकोमहा

न्गुणः कीर्तनादेवकृष्णस्यमुक्तबंधः परंव्रजेत् ४६ कृतेयद्ध्यायतोविष्णुंत्रेतायांयजतोमखैः द्वापरेपरिचर्यायांकलौतद्धरिकीर्तनात् ४७
कालस्तेपरमाण्वादिर्द्वि
परार्धावधिर्नृपकथितोयुगमानंचशृणुकल्पलयावपि १ चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यते सकल्पोयत्रमनवश्चतुर्दशविशां
पते २ तदंतेप्रलयस्तावान्ब्राह्मीरात्रिरुदाहृता त्रयोलोकाइमेतत्रकल्पंतेप्रलयायहि ३ एषनैमित्तिकःप्रोक्तःप्रलयोयत्रविश्वसृ
क् शेतेनंतासनोविश्वमात्मसात्कृत्यचात्मभूः ४ द्विपरार्धेत्वतिक्रांतेब्रह्मणःपरमेष्ठिनः तदाप्रकृतयःसप्तकल्पंतेप्रलयायवै ५ प्रा
एषप्राकृतिकोराजन्प्रलयोयत्रलीयते अंडकोशस्तुसंघातोविघातउपसादिते ६ पर्जन्यःशतवर्षाणिभूमौराजन्नवर्षति तदानिर
न्नेह्यन्योन्यंभक्षमाणाःक्षुधार्दिताः क्षयंयास्यंतिशनकैःकालेनोपद्रुताःप्रजाः ७ सामुद्रंदैहिकंभौमंरसंसांवर्तकोरविः रश्मिभिः
पिबतेघोरैःसर्वंनैवविमुंचति ८ ततःसंवर्तकोवह्निःसंकर्षणमुखोत्थितः दहत्यनिलवेगोत्थःशून्यान्भूविवरानथ ९ उपर्यधः
समंताच्चशिखाभिर्वह्निसूर्ययोः दह्यमानंविभात्यंडंदग्धगोमयपिंडवत् १० ततःप्रचंडपवनोवर्षाणामधिकंशतं परःसंवर्तको

Indira Gandhi National
Centre for the Arts

भा॰द्वा॰ वातिधूम्रंखंराजन्सागरं ११ ततोमेघकुलान्यंगचित्रवर्णान्यनेकशः शतंवर्षाणिवर्षंतिनदंतिरभसस्वनैः १२ ततएकोदकंविश्वंब्रह्मां
७ डविवरांतरं १३ तदाभूमेर्गंधगुणंग्रसंत्यापउदप्लवे ग्रस्तगंधातुपृथिवीप्रलयत्वायकल्पते १४ अपांरसमथोतेजस्तालीयंतेथनीरसाः
ग्रसतेतेजसोरूपंवायुस्तद्रहितंतदा लीयतेचानिलेतेजोवायोःखंग्रसतेगुणं सवैविशतिखंराजंस्ततश्चनभसोगुणं शब्दंग्रस
तिभूतादिर्नभस्तमनुलीयते तैजसश्चेंद्रियाण्यंगदेवान्वैकारिकोगुणैः १५ महान्ग्रसत्यहंकारंगुणाःसत्वादयश्चतं ग्रसतेऽव्याकृ
तंराजन्गुणान्कालेनचोदितं १६ नतस्यकालावयवैःपरिणामादयोगुणाः अनाद्यनंतमव्यक्तंनित्यंकारणमव्ययं १७ नयत्रवा
चोनमनोनसत्वंतमोरजोवामहदादयोमी नप्राणबुद्धींद्रियदेवतावानसंनिवेशःखलुलोककल्पः नस्वप्नजाग्रन्नचतत्सुषुप्तं
नखंजलंभूरनिलोग्निरर्कः संसुप्तवच्छून्यवदप्रतर्क्यंतन्मूलभूतंपदमामनंति १८ लयःप्राकृतिकोह्येषपुरुषाव्यक्तयोर्यदा
शक्तयःसंप्रलीयंतेविवशाःकालविद्रुताः १९ बुद्धींद्रियार्थरूपेणज्ञानंभातितदाश्रयं दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु ए॰
यत् २० दीपश्चक्षुश्चरूपंचज्योतिषोनपृथग्भवेत् एवंधीःखानिमात्राश्चनस्युरन्यतमादृतात् २१ बुद्धेर्जागरणंस्वप्नःसुषुप्ति ७

रितिचोच्यते मायामात्रमिदंराजन्नानात्वंप्रत्यगात्मनि २२ यथाजलधराव्योम्निभवंतिनभवंतिच ब्रह्मणीदंतथाविश्वमवयव्युदयाप्यया
त् २३ सत्यंह्यवयवःप्रोक्तःसर्वावयविनामिह विनार्थेनप्रतीयेरन्पटस्येवांगतंतवः २४ यत्सामान्यविशेषाभ्यामुपलभ्येतसभ्रमः अ
न्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तुयत् २५ विकारःख्यायमानोपिप्रत्यगात्मानमंतरा ननिरूप्योस्त्यणुरपिस्याच्चेच्चित्समआत्मवत् २६ नहिसत्यस्य
नानात्वमविद्वान्यदिमन्यते नानात्वंछिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव २७ यथाहिरण्यंबहुधासमीयतेनृभिःक्रियाभिर्व्यवहारवर्त्मसु ए
वंवचोभिर्भगवानधोक्षजोव्याख्यायतेलौकिकवैदिकैर्जनैः २८ यथाघनोर्कप्रभवोर्कदर्शितोह्यर्कांशभूतस्यचचक्षुषस्तमः एवंत्व
हंब्रह्मगुणस्तदीक्षितोब्रह्मांशकस्यात्मनआत्मबंधनः २९ घनोयदार्कप्रभवोविदीर्यतेचक्षुःस्वरूपंरविमीक्षतेतदा यदाह्यहंका
रउपाधिरात्मनोजिज्ञासयानश्यतितर्ह्यनुस्मरेत् ३० यदैवमेतेनविवेकहेतिनामायामयाहंकरणात्मबंधनं छित्वाच्युतात्मानुभ
वोवतिष्ठतेतमाहुरात्यंतिकमंगसंप्लवं ३१ नित्यदासर्वभूतानांब्रह्मादीनांपरंतप उत्पत्तिप्रलयावेकेसूक्ष्मज्ञाःसंप्रचक्षते ३२ कालस्रोतोजवे
नाशुह्रियमाणस्यनित्यदापरिणामिनामवस्थास्ताजन्मप्रलयहेतवः ३३ अनाद्यंतवतानेनकालेनेश्वरमूर्तिना अवस्थानैवदृश्यंते

Indira Gandhi National
Centre for the Arts

भा०द्वा० विपतिमोतियामिव ३६ नित्योनैमित्तिकश्चैवतथाप्राकृतिकोलयः आत्यंतिकश्चकथितःकालस्यगतिरीदृशी ३५ एताःकुरुश्रेष्ठजग
१० द्विधातुर्नारायणस्याखिलसत्वधाम्नः लीलाकथास्तेकथिताःसमासतः कात्स्न्येननाजोप्यभिधातुमीशः ३६ संसारसिंधुमतिदुस्तरमु
त्तितीर्षोर्नान्यःप्लवोभगवतःपुरुषोत्तमस्य लीलाकथारसनिषेवणमंतरेणपुंसोभवेद्विविधदुःखदवार्दितस्य ३७ पुराणसंहितामेतामृषि
र्नारायणोव्ययः नारदायपुराप्राहकृष्णद्वैपायनायसः सवैमह्यंमहाराजभगवान्बादरायणः इमांभागवतींप्रीतःसंहितांवेदसंमि
तां ३८ एतांवक्ष्यत्यसौसूतऋषिभ्योनैमिषालयेदीर्घसत्रेकुरुश्रेष्ठसंपृष्टःशौनकादिभिः ३९ ॥ इतिश्रीभागवतेमहापुराणेपारमहं
स्यांसंहितायांवैयासिक्यांद्वादशस्कंधेचतुर्थोध्यायः ४ श्रीशुकउवाच अत्रानुवर्ण्यतेभीक्ष्णंविश्वात्माभगवा
न्हरिः यस्यप्रसादजोब्रह्मारुद्रःक्रोधसमुद्भवः १ त्वंतुराजन्मरिष्येतिपशुबुद्धिमिमांजहि नजातःप्रागभूतोद्यदेहवत्त्वंनंक्ष्य एप
सि २ नभविष्यसिभूत्वात्वंपुत्रपौत्रादिरूपवान् बीजांकुरवद्देहादेर्व्यतिरिक्तोयथानलः ३ स्वप्नेयथाशिरश्छेदंपंचत्वाद्यात्मनः १८
स्वयंयस्मात्पश्यतिदेहस्यततआत्माह्यजोमरः ४ घटेभिन्नेयथाकाशआकाशःस्याद्यथापुरा एवंदेहेमृतेजीवोब्रह्मसंपद्यतेपुनः ५

मनःसृजतिवैदेहान्गुणान्कर्माणिचात्मनः तन्मनःसृजतेमायाततोजीवस्यसंसृतिः ६ स्नेहाधिष्ठानवर्त्यग्निसंयोगोयावदीयते ततोदीप
स्यदीपत्वमेवंदेहकृतोभवः रजःसत्वतमोवृत्त्याजायतेथविनश्यति नतत्रात्मास्वयंज्योतिर्योव्यक्ताव्यक्तयोःपरः आकाशइवचाधारो
ध्रुवोनंतोपमस्ततः ७ एवमात्मानमात्मस्थमात्मनैवामृशप्रभो बुध्यानुमानगर्भिण्यावासुदेवानुचिंतया ८ चोदितोविप्रवाक्येननत्वं
धक्ष्यतितक्षकः मृत्यवोनोपधक्ष्यंतिमृत्यूनांमृत्युमीश्वरं ९ अहंब्रह्मपरंधामब्रह्माहंपरमंपदं एवंसमीक्ष्यचात्मानमात्मन्याधायनि
ष्कले दशंतंतक्षकंपादेलेलिह्यानंविषाननैः नद्रक्ष्यसिशरीरंचविश्वंचपृथगात्मनः १० एतत्तेकथितंतातयथात्मापृष्टवान्नृप हरे
र्विश्वात्मनश्चेष्टांकिंभूयःश्रोतुमिच्छसि ११ ॥ इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायांवैयासिक्यांद्वादशस्कंधेपत्नयप्रमाणाल
लगांपंचमोध्यायः ॥ ५ ॥ सूतउवाच एतन्निशम्यमुनिनाभिहितंपरीक्षिद्व्यासात्मजेननिखिलात्मदृशासमेन तत्पादमूलमुपसृत्यनतेन
मूर्ध्नाबद्धांजलिस्तमिदमाहसविष्णुरातः १ राजोवाच सिद्धोस्म्यनुगृहीतोस्मिभवताकरुणात्मना श्रावितोयच्चमेसाक्षादनादिनि
धनोहरिः २ नात्यद्भुतमहंमन्येमहतामच्युतात्मनां अज्ञेषुतापतप्तेषुभूतेषुयदनुग्रहः ३ पुराणसंहितामेतामश्रौष्मभवतोवयंय

Indira Gandhi National
Centre for the Arts

भा॰ द्वा॰ सांख्यलत्र भस्त्रोको भगवाननुवर्ण्यते ४ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं प्रविष्टो ब्रह्मनिर्वाणमभयं दर्शितं त्वया ५ अनुजा
१९ नीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ६ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया भवता दर्शि
तं क्षेमं परं भगवतः पदं ७ सूत उवाच इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः जगाम भिक्षुभिः साकं नरदेवेन पूजितः ८ परीक्षिद
पि राजर्षिरात्मन्यात्मानमात्मना समाधाय परं ध्यायन्नस्पंदासुर्यथा तरुः प्राक्कूले बर्हिष्यासीनो गंगाकूल उदङ्मुखः ब्रह्मभूतो म
हायोगी निःसंगश्छिन्नसंशयः ९ तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना हंतुकामो नृपं गच्छन्ददर्श पथि कश्यपं १० तं
तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणं द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपं ११ ब्रह्मभूतस्य राजर्षेर्देहोहिगरलाग्निना बभ
व भस्मसात्सद्यः पश्यतां सर्वदेहिनां १२ हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः विस्मिता ह्यभवन्सर्वे देवासुरनरादयः १३ एषः
देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः १४ जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितं ९
यथाजुहाव संक्रुद्धः सर्पान्सत्रे सह द्विजैः १५ सर्पसत्रे समिद्धाग्नौ दह्यमानान्महोरगान् दृष्ट्वेंद्रं भयसंविग्नस्तक्षकः शरणं ययौ
१६

अपश्यंस्तक्षकं तत्र राजा पारीक्षितो द्विजान् उवाच तक्षकः कस्मान्न दह्येतोरगाधमः १७ तं गोपायति राजेंद्र शक्रः शरणमागतं तेन संस्तंभितः
सर्पस्तस्मान्नाग्नौ पतत्यसौ १८ पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः सहेंद्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते १९ तच्छ्रुत्वाजुहुवुर्विप्राः
सहेंद्रं तक्षकं मखे तक्षकाशु पतस्वेह सहेंद्रेण मरुत्वता २० इति ब्रह्मोदिताक्षेपैः स्थानादिंद्रः प्रचालितः बभूव संभ्रांतमतिः सवि
मानः सतक्षकः २१ तं पतंतं विमानेन सह तक्षकमंबरात् विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः २२ नैष त्वया मनुष्येंद्र वध
मर्हति सर्पराट् अनेन पीतममृतमथ वा अजरामरः २३ जीवितं मरणं जंतोर्गतिः स्वेनैव कर्मणा राजंस्ततोन्यो नास्त्यस्य प्रदाता
सुखदुःखयोः २४ सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप पंचत्वमृच्छते जंतुर्भुंक्त आरब्धकर्म तत् २५ तस्मात्सत्रमिदं राजन्संस्
थीयताभिचारिकं सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते २६ इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः सर्पसत्रादुपरतः पूजया
मास वाक्पतिं २७ सैषा विष्णोर्महामायाबाध्ययालक्षणाय या मुह्यंत्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः २८ न यत्र दंभीत्यभ
या विराजिता मायात्मवादे सकृदात्मवादिभिः न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्तियत् २९ न यत्र सृज्यं

Indira Gandhi National
Centre for the Arts

भा॰द्वा॰ सजंतोभयोः परंब्रह्मजीवल्लिभिरन्वितमहं तदेतद्रुत्सादिनवाध्यवाधकं निषिध्यचोर्मिनविरमेतस्वयंमुनिः ३० परपदंवैस्मवमा
१० मनंतिजघन्येतिनेतीत्यतदुत्सिसत्तवः विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्यावसितंसमाहितैः ३१ तएतदधिगच्छंतिविष्णो
र्यत्परमंपदं अहंममेतिदौर्जन्यंनयेषांदेहगेहजं ३२ अतिवादांस्तितिक्षेतनावमन्येतकंचनः नचेमंदेहमाश्रित्यवैरंकुर्वीतके
नचित् ३३ नमोभगवतेतस्मैकृष्णायाकुंठमेधसे यत्पादांबुरुहध्यानात्संहितामध्यगामिमां ३४ शौनकउवाच पैलादिभिर्व्या
सशिष्यैर्वेदाचार्यैर्महात्मभिः वेदाश्चकथिताव्यस्ताएतत्सौम्याभिधेहिनः ३५ सूतउवाच समाहितात्मनोब्रह्मन्ब्रह्मणःपरमेष्ठिनः
हृद्याकाशादभून्नादोवृत्तिरोधाद्विभाव्यते ३६ यदुपासनयाब्रह्मन्योगिनोमलमात्मनः द्रव्यक्रियाकारकाख्यंधूत्वायांत्यपुनर्भवं ३७
ततोभूत्त्रिवृदोंकारोयोव्यक्तप्रभवःस्वराट् यत्तल्लिंगंभगवतोब्रह्मणःपरमात्मनः ३८ शृणोतियइमंस्फोटंसुप्तश्रोत्रेचशून्यदृक् येन रामः
वाग्व्यज्यतेयस्यव्यक्तिराकाशआत्मनः ३९ स्वधाम्नोब्रह्मणःसाक्षाद्वाचकःपरमात्मनः ससर्वमंत्रोपनिषद्वेदबीजंसनातनं ४० १०
तस्यह्यासंस्त्रयोवर्णाअकाराद्याभृगूद्वह धार्यंतेयैस्त्रयोभावागुणनामार्थवृत्तयः ४१ ततोक्षरसमाम्नायमसृजद्भगवानजः अं

तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं तेनासौचतुरोवेदांश्चतुर्भिर्वदनैर्विभुः सव्याहृतिकान्सोंकारान्चातुर्होत्रविवक्षया ४२ पुत्रानध्यापयत्तां
स्तुब्रह्मर्षीन्ब्रह्मकोविदान् तेतुधर्मोपदेष्टारःस्वपुत्रेभ्यःसमादिशन् ४३ तेपरंपरयाप्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः चतुर्युगेष्वथव्यस्ताद्वापरादौ
महर्षिभिः ४४ क्षीणायुषःक्षीणसत्वान्दुर्मेधान्वीक्ष्यकालतः वेदान्ब्रह्मर्षयोव्यस्यन्हृदिस्थाच्युतचोदिताः ४५ अस्मिन्नप्यंतरेब्रह्म
न्भगवांल्लोकभावनः ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये पराशरात्सत्यवत्यामंशांशकलयाविभुः अवतीर्णोमहाभागवेदंच
क्रेचतुर्विधं ४६ ऋगथर्वयजुःसाम्नांराशीरुद्धृत्यवर्गशः चतस्रःसंहिताश्चक्रेमंत्रैर्मणिगणाइव ४७ तासांसचतुरःशिष्यानुपाहू
यमहामतिः एकैकांसंहितांब्रह्मन्नेकैकस्मैददौविभुः ४८ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह वैशंपायनसंज्ञायनिगदाख्यंयजु
र्गणं ४९ साम्नांजैमिनयेप्राहतथाछंदोगसंहितां अथर्वांगिरसींनामस्वशिष्यायसुमंतवे ५० पैलःस्वसंहितामूचइंद्रप्रमितयेमुनिः
बाष्कलायचसोप्याहशिष्येभ्यःसंहितांस्वकां चतुर्धाव्यस्यबोध्याययाज्ञवल्क्यायभार्गव पराशरायाग्निमित्रइंद्रप्रमितिरात्मवान्
अध्यापयत्संहितांस्वांमांडूकेयमृषिंकविं ५१ तस्यशिष्योदेवमित्रःसौभर्यादिभ्यऊचिवान् ५२ शाकल्यस्तत्सुतःस्वांतुपंचधाव्यस्यसंहि

Indira Gandhi National
Centre for the Arts

।भा॰३। तां वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ५३ जातकर्णश्च तच्छिष्यः सनिरुक्तां स्वसंहितां। बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ५४
।२१। बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहितां चक्रे वालायनिर्भज्यः कासारश्चैव तां दधुः ५५ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः श्रुत्वै
तत्छंदसां व्यासं सर्वपापैः प्रमुच्यते ५६ वैशंपायनशिष्यो वै चरकाध्वर्युर्वोभवत्। यच्चीर्णं ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ५७ याज्ञवल्क्य
श्च तच्छिष्य आहाहो भगवन्कियत्। चरितेनाल्पसाराणां चरिष्येहं सुदुश्चरं ५८ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया विप्रावमंत्रा शिष्ये
णामधीतं त्यजाश्विति ५९ देवरातसुतः सोपि छर्दित्वा यजुषां गणं ततो गतो यमुनयो ददृशुस्तान्यजुर्गणान् ६० यजूंषि तित्तिरा भू
त्वा तल्लोलुपतयाददुः। तैत्तिरीयास्ततो याताः शाखा आसन्सुपेशलाः ६१ याज्ञवल्क्यस्ततो ब्रह्मंश्छंदांस्यधिगवेषयन् गुरोरविद्यमा
नानि सूपतस्थेर्कमीश्वरं ६२ याज्ञवल्क्य उवाच ॐ नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण च चतुर्वि ।एम॥
धभूतनिकायानां ब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषु बहिरपि चाकाश इवोपाधिनाव्यवधीयमानो भगवानेक एव क्षणलव ।११।
निमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ६३ यदु ह वाव विबुधर्षभ सवितरदस्त

पस्यानुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जनेन भगवतः समभिधीमहि तपनमंडलं ६४ य इह वाव स्थि
रचरनिकराणां निजनिकेतनानां मनइंद्रियासुगणाननात्मनः स्वयमात्मांतर्यामी प्रचोदयति ६५ य एवमं लोकमतिकरालवदनांधकारसंज्ञा
जगरहग्रस्तं मृतकमिव विचेतनमवलोक्यानुकंपया परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्था
ने प्रवर्तयत्यवनिपतिरिवासाधूनां भयमुदीरयन्नटति परित आशापालैस्तत्र तत्र कमलकोशांजलिभिरुपहृतार्हणः ६६ अथ ह भग
वंस्तव चरणनलिनयुगलं त्रि भगवान्वाजिरूपधरो रविः यजूंष्ययातयामानि मुनयेत्यसृजद्विनः ६८ यजुर्भिरकरोच्छाखा दश पंचशतैर्वि
भुः। जगृहुर्वाजिनस्ताः काण्वमाध्यंदिनादयः ६९ जैमिनेः सामगस्यासीत्सुमंतुस्तनयो मुनेः सुत्वांस्तत्सुतस्ताभ्यामेकैकां प्रा
ह संहितां ७० सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विज हिरण्यनाभः कौशल्यः पौष्यंजि
श्च सुकर्मणः शिष्यौ जगृहतुस्त्वाप्य आवंत्यो ब्रह्मवित्तमः ७१ उदीच्याः सामगाः शिष्या आसन्पंचशतानि वै पौष्यंज्यावंत्य
योश्चापि तांश्च प्राच्यान्प्रचक्षते ७२ लोकाक्षिर्लांगलिः कुल्यः कुसीदः कक्षिरेव च पौष्यंजिशिष्या जगृहुः संहितास्ते शतं शतं

Indira Gandhi National
Centre for the Arts

भा०द्वा० ७९ कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः शिष्य ऊचे स्वशिष्येभ्यः शेषा आवंत्य आत्मवान् ७४ इति श्रीभागवते महापुराणे पारमहंस्यां सं
१९५ हितायां वैयासिक्यां द्वादशस्कंधे वेदशाखाप्रणयनं षष्ठोऽध्यायः ६ सूत उवाच अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकां संहितां सो
पि पथ्याय वेददर्शाय चोक्तवान् १ शौक्लायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु कुमु
दः शुनको ब्रह्मन्जाजलिश्चाप्यथर्ववित् २ बभ्रुः शिष्याथांगिरसः सैंधवायन एव च अधीयेतां संहिते द्वे सावर्णाद्यास्तथापरे नक्ष
त्रकल्पः शांतिश्च कश्यपांगिरसादयः ३ एते आथर्वणाचार्याः शृणु पौराणिकान्मुने ४ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्र
णः शिंशपायनहारीतौ षड्वै पौराणिका इमे अधीयंत व्यासशिष्यात्संहितां मत्पितुर्मुखात् एकैकामहमेतेषां शिष्यः सर्वाः स
मध्यगां ५ कश्यपोहं च सावर्णी रामशिष्योकृतव्रणः अधीमहि व्यासशिष्याच्चत्वारो मूलसंहिताः ६ पुराणलक्षणं ब्रह्मन्ब्र
ह्मर्षिभिर्निरूपितं शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ७ सर्गोस्याथ विसर्गश्च वृत्ती रक्षांतराणि च वंशो वंशानुचरि | राम: १२
तं संस्था हेतुरपाश्रयः ८ दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थया ९ अव्याकृतगुण

क्षोभात् महतस्त्रिवृतोहमः भूतमात्रेंद्रियार्थानां संभवः सर्ग उच्यते ११ पुरुषानुगृहीतानामेतेषां वासनामयः विसर्गोयं समाहारो बीजाद्बीजं चरा
चरं १२ वृत्तिर्भूतानि भूतानां चराणामचराणि च कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा १३ रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे तिर्य
ङ्मर्त्यर्षिदेवेषु हन्यंते यैस्त्रयीद्विषः १३ मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ऋषयोंशावताराश्च हरेः षड्विधमुच्यते १४ राज्ञां ब्रह्मप्रसूती
नां वंशस्त्रैकालिकोन्वयः वंशानुचरितं तेषां वृत्तं वंशधराश्च ये १५ नैमित्तिकः प्राकृतिको नित्य आत्यंतिको लयः संस्थेति कविभिः
प्रोक्तश्चतुर्धास्य स्वभावतः १६ हेतुर्जीवोस्य सर्गादेरविद्याकर्मकारकः यं चानुशयिनं प्राहुरव्याकृतमुतापरे १७ व्यतिरेकान्वयो यस्य
जाग्रत्स्वप्नसुषुप्तिषु मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः १८ पदार्थेषु यथा द्रव्यं तन्मात्रं रूपनामसु बीजादिपंचतांतासु
वस्थासु युतायुतं १९ विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयं योगेन वा तदात्मानं वेदेहाया निवर्त्तते १० एवं लक्षणलक्ष्याणि पुरा
णानि पुराविदः मुनयोष्टादश प्राहुः क्षुल्लकानि महांति च २१ ब्राह्मं पाद्मं वैष्णवं च शैवं लिंगं सगारुडं नारदीयं भागवतमाग्नेयं स्कं
दसंज्ञितं भविष्यं ब्रह्मवैवर्त्तं मार्कंडेयं सवामनं वाराहं मात्स्यं कौर्म्यं च ब्रह्मांडाख्यमिति त्रिषट् २२ ब्रह्मन्नेतत्समाख्यातं शाखाप्रण

Indira Gandhi National
Centre for the Arts

पर्वभेः शिष्यप्रशिष्याणां ब्रह्मतेजोविवर्द्धनं २२

सूतजीवचिरंसाधोवदनोवदतांवर तमस्यपारेभ्रमतांनॄणांत्वंपारदर्शनः १ आहुश्चिरायुषम्
षिंमृकंडुतनयंजनाः यः कल्पांतेउर्वरितोयेनग्रस्तमिदंजगत २ सवाअस्मत्कुलोत्पन्नःकल्पेस्मिनभार्गवर्षभः नैवाधुनापिभूतानां
संप्लवःकोपिजायते ३ एकएवार्णवेभ्राम्यनददर्शपुरुषंकिल वटपत्रपुटेतोकंशयानंत्वेकमद्भुतं ४ एषनःसंशयोभूयानसू
तकौतूहलंयतः तंनश्छिंधिमहायोगीपुराणेष्वपिसंमतः ५ सूतउवाच प्रश्नस्त्वयामहर्षेयंकृतोलोकभ्रमापहः नारायणकथाय
त्रगीताकलिमलापहा ६ प्राप्तद्विजातिसंस्कारोमार्कंडेयःपितुःक्रमात छंदांस्यधीत्यधर्मेणतपःस्वाध्यायसंयुतः ७ बृहद्व्रतधरः
शांतोजटिलोवल्कलांबरः बिभ्रत्कमंडलुंदंडमुपवीतंसमेखलं ८ कृष्णाजिनंसाक्षसूत्रंकुशांश्चनियमर्द्धये अग्न्यर्कगुरुविप्रात्म
स्वर्चयनसंध्ययोर्हरिं ९ सायंप्रातःसगुरवेभैक्ष्यमाहृत्यवाग्यतः बुभुजेगुर्वनुज्ञातःसकृन्नोचेदुपोषितः ४ एवंतपःस्वाध्यायप
रोवर्षाणामयुतायुतं आराधयनहृषीकेशंजिग्येमृत्युंसुदुर्जयं ७ ब्रह्माभृगुर्भवोदक्षोब्रह्मपुत्राश्चयेपरे नृदेवपितृभूतानितेनास



न्नतिविस्मिताः ८० इत्थंबृहद्व्रतधरस्तपःस्वाध्यायसंयमैः दध्यावधोक्षजंयोगीध्वस्तक्लेशांतरात्मना ९ तस्यैवंयुंजतश्चित्तंमहायोगे
नयोगिनः व्यतीयायमहान्कालोमन्वंतरषडात्मकः १० एतत्पुरंदरोज्ञात्वासप्तमेस्मिन्किलांतरे तपोविशंकितोब्रह्मन्नारेभेतद्विघा
तनं ११ गंधर्वाप्सरसःकामंवसंतमलयानिलौ मुनयेप्रेषयामासरजस्तोकमदौतथा १२ तेवैतदाश्रमंजग्मुर्हिमाद्रेःपार्श्वउत्तरे पु
ष्पभद्रानदीयत्रचित्राख्याचशिलाविभो १३ तदाश्रमपदंपुण्यंपुण्यद्रुमलतांचितं पुण्यद्विजकुलाकीर्णंपुण्यामलजलाशयं मत्तभ्र
मरसंगीतंमत्तकोकिलकूजितं मत्तबर्हिनटाटोपंमत्तद्विजकुलाकुलं वायुःप्रविष्टआदायहिमनिर्झरशीकरान सुमनोभिःपरिष्वक्तोव
वावुत्तंभयनस्मरं १४ उद्यच्चंद्रनिशावक्त्रःप्रवालस्तबकालिभिः गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः १५ अन्वीयमानोगंध
र्वैर्गीतवादित्रयूथपैः अदृश्यतात्तचापेषुःस्वःस्त्रीयूथपतिःस्मरः १६ हुत्वाग्निंसमुपासीनंददृशुःशक्रकिंकराः मीलिताक्षंदुरा
धर्षंमूर्तिमंतमिवानलं १७ ननृतुस्तस्यपुरतःस्त्रियोथोगायकाजगुः मृदंगवीणापणवैर्वाद्यंचक्रुर्मनोरमं १८ संदधेस्त्रंस्व
धनुषिकामःपंचमुखंतदा मधुर्मनोरजस्तोकइंद्रभृत्याव्यकंपयन १९ क्रीडंत्याःपुंजिकस्थल्याःकंदुकैःस्तनगौरवात भृशमुद्विग्न

Indira Gandhi National
Centre for the Arts

भा॰द्वा॰ मध्यायाः केशविस्रंसितस्रजः इतस्ततो भ्रमद्दृष्टेश्चलंत्या अनु कंदुकं वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलं २० विससर्ज ततो बाणं मत्वा तं स्वजितं स्मरः
१५ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः २१ तस्य त्वमपकुर्वंतो मुनेस्तत्तेजसा मुने दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकाः २२ इतींद्रानुचरै
र्ब्रह्मन्धर्षितोपि महामुनिः यन्नागादहमो भावं न तच्चित्रं महत्सु हि २३ दृष्ट्वा निस्तेजसं कामं सगणं भगवान्स्वराट् श्रुत्वानुभावं ब्रह्मर्षेर्वि
स्मयं समगात्परं २४ तस्यैवं युंजतश्चित्तं तपःस्वाध्यायसंयमैः अनुग्रहायाविरासीन्नरनारायणो हरिः २५ तौ शुक्लकृष्णौ नवकंजलोचनौ
चतुर्भुजौ रौरववल्कलांबरौ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं पद्माक्षमालामुत जंतुमार्जनं वेदं च साक्षात्तप एव
रूपिणौ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ २६ ते वै भगवतो रूपे नरनारायणावृषी दृष्ट्वोत्थायादरेणोच्चै
र्ननामांगेन दंडवत् २७ स तत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं २८ उत्थाय प्रांजलिः
प्रह्वः औत्सुक्यादाश्लिषन्निव नमो नम इतीशानौ बभाषे गद्गदाक्षरः २९ तयोरासनमादाय पादयोरवनिज्य च अर्हणेनानुलेपेन एमः
धूपमाल्यैरपूजयत् ३० सुखमासनमासीनौ प्रसादाभिमुखौ मुनी पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ३१ मार्कंडेय उवाच॥ १५

किं वर्णये तव विभो यदुदीरितोसुः संस्पंदते तमनु वाङ्मनइंद्रियाणि स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः ३२ मूर्ती
इमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै नाना बिभर्ष्यवितुमन्यतनूर्यथेदं सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ३३
तस्यावितुः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरुजः स्पृशंति यद्वै स्तुवंति निनमंति यजंत्यभीक्ष्णं ध्यायंति वेदहृदया मुनयस्त
दाप्त्यै ३४ नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितोभिय ईश विद्मः ब्रह्मा बिभेत्यलमतो द्विपरार्धधिष्ण्यः कालस्य ते किमुत तत्कृत
भौतिकानां ३५ तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते तर्हि सर्व
मनीषितार्थं ३६ सत्त्वं रजस्तम इतीश तवात्मबंधो मायामयाः स्थितिलयोदयहेतवोस्य लीलाधृता यदपि सत्त्वमयी प्रशांत्यै नान्ये
नृणां व्यसनमोहभियश्च याभ्यां ३७ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजंति यत्सात्वताः पुरुषरूपमु
शंति सत्त्वं लोको यतोभयमुतात्मसुखं न चान्यत् ३८ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवतायै नारायणाय ऋ
षये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ३९ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वखेषु असुषु ह्यपि हृत्पथेषु तन्मायया

Indira Gandhi National
Centre for the Arts

।भा०द्वा०।
।१२।

वृत्तमतिः स उपरमात्मा दाध्यत्तेलिलगरो रूपसाधवेदं ४८ यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यंति यत्र कवयोऽजपरा यतंतः तं सर्ववादविषयप्र
तिरूपशीलं वंदे महापुरुषमात्मनिगूढबोधं ४९ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे मार्कंडेयोपाख्या
ने नारायणस्तुतिर्नामाष्टमोऽध्यायः ८ सूत उवाच संस्तुतो भगवानित्थं मार्कंडेयेन धीमता नारायणो नरसखः प्रीत आह भृगूद्वहं १
श्रीभगवानुवाच भो भो ब्रह्मर्षिवर्योसि सिद्ध आत्मसमाधिना मयि भक्त्यानपायिन्या तपःस्वाध्यायसंयमैः २ वयं ते परितुष्टाः स्म
त्वद्बृहद्व्रतचर्यया वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सितं ३ ऋषिरुवाच जितं ते देवदेवेश प्रपन्नार्तिहराच्युत वरेणैतावतालं नो
यद्भवान्समदृश्यत ४ गृहीत्वाजादयो यस्य श्रीमत्पादाब्जदर्शनं मनसा योगपक्वेन स भवान्मेक्षगोचरः ५ अथाप्यंबुजप
त्राक्ष पुण्यश्लोकशिखामणे द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदां ६ सूत उवाच इतीडितोर्चितः काममृषिणा भगवा एमः
न्मुने तथेति स स्मयन्प्रागाद्बदर्याश्रममीश्वरः ७ तमेव चिंतयन्नर्थमृषिः स्वाश्रम एव सः वसन्नग्न्यर्कसोमांबुभूवायुवियद १२
त्मसु ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् ८ क्वचित्पूजां विसस्मार प्रेमप्रसरसंप्लुतः ९ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुनेः

उपासीनस्य संध्यायां ब्रह्मन्वायुरभून्महान् १० तं चंडशब्दं समुदीरयंतं बलाहका अन्वभवन्करालाः अक्षस्थविष्ठा मुमुचुस्तडिद्भिः
स्वनंत उच्चैरभिवर्षधाराः ११ ततो व्यदृश्यंत चतुः समुद्राः समंततः क्ष्मातलमाग्रसंतः समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः
१२ अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभीरुपतापितं जगत् चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत्
१३ तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः आपूर्यमाणो वर्षद्भिरंबुदैः क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः स
मं १४ सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतं स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडांध
वत् १५ क्षुत्तृट्परीतो मकरैस्तिमिंगिलैरुपद्रुतो वीचिनभस्वताहतः तमस्यपारे पतितो भ्रमन्दिशो न वेद खं गां च परिश्रमेषितः १६
क्वचिन्मग्नो महावर्ते तरलैस्ताडितः क्वचित् यादोभिर्भक्ष्यते क्वापि स्वयमन्योन्यघातिभिः १७ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं
भयं क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः १८ अयुतायुतवर्षाणां सहस्राणि शतानि च व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमा
यावृतात्मनः १९ स कदाचिद्भ्रमंस्तस्मिन्पृथिव्याः ककुदि द्विजः न्यग्रोधपोतं ददृशे फलपल्लवशोभितं २० प्रागुत्तरस्यां शा

Indira Gandhi National
Centre for the Arts

भा·द्वा· त्वायां तस्यापि ददृशे शिशुं शयानं पर्णपुटके ग्रसंतं प्रभया तमः १९ महामरकतश्यामं श्रीमद्वदनपंकजं कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवं
२६ २० श्वासैजदलकाभातं कंबुश्रीकर्णदाडिमं विद्रुमाधरभासेषच्छोणायितसुधास्मितं २१ पद्मगर्भारुणापांगं हृद्यहासावलोकनं श्वासै
जद्वलिसंविग्ननिम्ननाभिदलोदरं २१ चार्वंगुलिभ्यां पाणिभ्यामुन्नीय चरणांबुजं मुखे निधाय विप्रेंद्रो धयंतं वीक्ष्य विस्मितः २२ तद्दर्श
नाद्वीतपरिश्रमो मुदोत्फुल्लहृत्पद्मविलोचनांबुजः प्रहृष्टरोमाद्भुतभावशंकितः प्रष्टुं पुरस्तं प्रससार बालकं २३ तावच्छिशोर्वैश्व
सितेन भार्गवः सोंतः शरीरं मशको यथाविशत् तत्राप्यदोन्यस्तमचष्ट कृत्स्नशो यथा पुरामुह्यदतीव विस्मितः २४ खं रोदसी भगणा
नद्रिसागरान्द्वीपान्सवर्षान्ककुभः सुरासुरान् वनानि देशान्सरितः पुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः महांति भूतान्य
थ भौतिकान्यसौ कालं च नानायुगकल्पकल्पनं यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितं हिमालयं पुष्पवहां च राम:
तां नदीं निजाश्रमं यत्र ऋषीनपश्यत् २५ विश्वं विपश्यन्श्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ २६ तस्मिन्पृथिव्याः ककु १८
दि प्ररूढं वटं च तत्पर्णपुटे शयानं तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोपांगनिरीक्षणेन अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं

हृदि अभ्यपात् अति संक्लिष्टः परिष्वक्तुमधोक्षजं २७ तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता
२८ तमन्वथ वटो ब्रह्मन्सलिलं लोकसंप्लवः तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः २९ इति श्रीभागवते महापुराणे पारमहंस्यां संहितां
यां वैयासिक्यां द्वादशस्कंधे भगवन्मायादर्शनं नवमोऽध्यायः ९ सूत उवाच स एवमनुभूयेदं नारायणविनिर्मितं वैभवं योगमायायास्त
मेव शरणं ययौ १ ऋषिरुवाच प्रपन्नोऽस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे यन्माययापि विबुधा मुह्यंति ज्ञानकाशया २ सूत उवाच
तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ३ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत पश्येमं भगव
न्विप्रं निभृतात्मेंद्रियाशयं निभृतोदझषव्रातो वातापाये यथार्णवः ४ कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ५ श्रीभगवानुवाच
नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ६ अथापि संवदिष्यामो भवान्येतेन साधुना अयं
हि परमो लाभो नृणां साधुसमागमः ७ इत्युक्त्वा तमुपेयाय भगवान्स सतां गतिः ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनां ८ तयोरा
गमनं साक्षादीशयोर्जगदात्मनोः न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ९ भगवांस्तदभिज्ञाय गिरिशो योगमायया आविशत्तद्गुहा

Indira Gandhi National
Centre for the Arts

भ.द्वा. काशंवायुमिवेश्वरः १० आत्मन्यपिशिवंप्राप्तंतडित्पिंगजटाधरं त्र्यक्षंदशभुजंप्रांशुमुद्यंतमिवभास्करं व्याघ्रचर्मांबरंशूलधनुरिषुसि
९१ चर्मभिः अक्षमालाडमरुककपालपरशुंसह विभ्राणंसहसाभातंविचक्ष्यहृदिविस्मितः ११ किमिदंकुतएवेतिसमाधेर्विरतोमुनिः नेत्रे
उन्मील्यददृशेसगणंसोमयागतं रुद्रंत्रिलोकैकगुरुंननामशिरसामुनिः १२ तस्मैसपर्य्यांव्यदधात्सगणायसहोमया स्वागतासनपाद्या
र्घ्यगंधस्रग्धूपदीपकैः १३ आहचात्मानुभावेनपूर्णकामस्यतेविभो करवामकिमीशानयेनेदंनिर्वृतंजगत् १४ नमः शिवायशांताय
सत्वायप्रमृडायच रजोजुषेथघोरायनमस्तुभ्यंतमोजुषे १५ सूतउवाच एवंस्तुतः सभगवान्महादेवःसतांगतिः परितुष्टःप्रसन्ना
त्माप्रहसंस्तमभाषत १६ श्रीभगवानुवाच वरंवृणीष्वनः कामंवरदेशावयंत्रयः अमोघंदर्शनंयेषांमर्त्योयद्विंदतेमृतं १७ ब्रा
ह्मणाः साधवः शांतानिःसंगाभूतवत्सलाः एकांतभक्ताअस्मासुनिर्वैराः समदर्शिनः सलोकालोकपालास्तान्वंदंत्यर्चंत्युपासते एमः
अहंचभगवान्ब्रह्मास्वयंचहरिरीश्वरः १८ नतेमय्यच्युतेजेचभिदामण्वपिचक्षते नात्मनश्चजनस्यापितद्युष्मान्वयमीमहि १९
नह्यम्मयानितीर्थानिनदेवाश्चेतनोज्झिताः तेपुनंत्युरुकालेनयूयंदर्शनमात्रतः २० ब्राह्मणेभ्योनमस्यामोयेस्मद्रूपंत्रयीमयं

विभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः २१ श्रवणाद्दर्शनाद्वापिमहापातकिनोपिवः शुध्येरन्नंत्यजाश्चापिकिमुसंभाषणादिभिः २२ सूतउ
वाच इतिचंद्रललामस्यधर्मगुह्योपबृंहितं वचोमृतायनमृषिर्नातृप्यत्कर्णयोःपिबन् २३ सचिरंमाययाविष्णोर्भ्रामितःकर्शितोभृशं
शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत् २४ ऋषिरुवाच अहोईश्वरचेष्टेयंदुर्विभाव्याशरीरिणां यन्नमंतीशितव्यानिस्तुवंतिजग
दीश्वराः २५ धर्मंग्राहयितुंप्रायःप्रवक्तारश्चदेहिनां आचरंत्यनुमोदंतेक्रियमाणंस्तुवंतिच २६ नैतावताभगवतःस्वमायामयवृ
त्तिभिः नदुष्येतानुभावस्तैर्मायिनःकुहकंयथा २७ सृष्ट्वेदंमनसाविश्वमात्मनानुप्रविश्यपः गुणैःकुर्वद्भिराभातिकर्तेवस्वप्नदृ
ग्यथा तस्मैनमोभगवतेत्रिगुणायगुणात्मने केवलायाद्वितीयायगुरवेब्रह्ममूर्तये २९ कंवृणेनुपरंभूमन्वरंत्वद्वरदर्शनात् यद्दर्श
नात्पूर्णकामःसत्यकामःपुमान्भवेत् वरमेकंवृणेथापिपूर्णात्कामाभिवर्षणात् भगवत्यच्युतांभक्तिंतत्परेषुतथात्वयि ३० सूतउवा
च इत्यर्चितोभिष्टुतश्चमुनिनासूक्तयागिरा तमाहभगवान्शर्वःशर्वयाचाभिनंदितः ३१ काममहर्षेसर्वोयंभक्तिमांस्त्वमधोक्ष
जे आकल्पांताद्यशःपुण्यमजरामरतातथा ज्ञानंत्रैकालिकंब्रह्मन्विज्ञानंचविरक्तिमत् ब्रह्मवर्चस्विनोभूयात्पुराणाचार्यतास्तुते ३२

Indira Gandhi National
Centre for the Arts

भा·द·
२८
सूतउवाच एवंवरान्सभनये दत्त्वागात्त्र्यस्नईश्वरः देव्यैतत्कर्मकथयन्ननुभूतं पुरामुना ३३ सोप्यवाप्तमहायोगमहिमा भार्गवोत्तमः विचरत्यधुना
प्यद्यापि हरावेकांतितांगतः ३४ अनुवर्णितमेतत्ते मार्कंडेयस्य धीमतः अनुभूतं भगवतो मायावैभवमद्भुतं ३५ एतत्केचिदविद्वांसो मा
यासंसृतिरात्मनः अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ३६ य एवमेतद्भृगुवर्य वर्णितं रथांगपाणेरनुभावभावितं संश्राव
येत्संशृणुयादु ताउभौ तयोर्नकर्माशयसंसृतिर्भवेत् ३७ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे
मार्कंडेयोपाख्यानं दशमोऽध्यायः १० शौनकउवाच अथेममर्थं पृच्छामो भवंतं बहुवित्तमं समस्ततंत्रराद्धांते भवान्भागवततत्त्ववित्
१ तांत्रिकाः परिचर्यायां केवलस्य श्रियः पतेः अंगोपांगायुधाकल्पं कल्पयंति यथैव यैः तन्नो वर्णाय भद्रं ते क्रियायोगं बुभुत्स
तां येन क्रियानैपुणानां मर्त्यो यायादमर्त्यतां २ सूतउवाच नमस्कृत्वा गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि याः प्रोक्ता वेदतंत्राभ्यामाचा ए·भा·
र्यैः पद्मजादिभिः ३ मायाद्यैर्नवभिस्तत्त्वैः सविकारमयो विराट् निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं ४ एतद्वै पौरुषं रूपं भूः २८
पादौ द्यौः शिरो नभः नाभिः सूर्योक्षिणी नासे वायुः कर्णौ दिशः प्रभोः प्रजापतिः प्रजननमपानो मृत्युरीशितुः तद्बाहवो लोकपा

लामनप्वंज्ञोधश्चैवोपमः लज्जोत्तरोधरोलोभो दंतज्योत्स्नाः स्मयो भ्रमः रोमाणि भूरुहा भर्त्रो मेघाः पुरुषमूर्द्धजाः ५ यावानयं वै पुरुषो
यावत्यासंस्थयामितः तावानसावपि महापुरुषो लोकसंस्थया ६ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्विभर्त्यजः तत्प्रभाव्यापिनी
साक्षाच्छ्रीवत्समुरसा विभुः ७ स्वमायां वनमालाख्यां नानागुणमयीं दधत् वासश्छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं ८ विभर्ति सां
ख्यं योगं च देवो मकरकुंडले मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरं ९ अव्याकृतमनंताख्यमासनं यदधिष्ठितः धर्मज्ञाना
दिभिर्युक्तं सत्त्वं पद्ममिहोच्यते १० ओजः सहो बलयुतं मुख्यतत्त्वं गदां दधत् अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनं नभो निभं नभ
स्तत्त्वमसिं चर्म तमोमयं कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं ११ इंद्रियाणि शरानाहुराकूतीरस्य स्यंदनं तन्मात्राण्यस्या
भिव्यक्तिं मुद्रयार्थक्रियात्मतां १२ मंडलं देवयजनं दीक्षा संस्कार आत्मनः परिचर्या भगवत आत्मनो दुरितक्षयः १३ भग
वान्भगशब्दार्थं लीलाकमलमुद्वहन् धर्मं यशश्च भगवान् चामरव्यजनेऽभजत् १४ आतपत्रं तु वैकुंठं द्विजा धामाकुतोभयं त्रि
वृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं १५ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः विष्वक्सेनस्तंत्रमूर्तिर्विदितः पार्षदाधिपः नंदादयो

Indira Gandhi National
Centre for the Arts

भा०द्वा० योगस्याङ्गेनेणिमाद्याहरेर्गुणाः १६ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं अनिरुद्धइतिब्रह्मन्मूर्त्तिव्यूहोभिधीयते १७ सविश्वस्तै
१९ जसः प्राज्ञस्तुरीयइतिवृत्तिभिः अर्थेन्द्रियाशयज्ञानैर्भगवान्परिभाव्यते १८ अंगोपांगायुधाकल्पैस्तन्मसः प्राज्ञस्तुरीयइतिवृत्तिभिः अ
चतुर्मूर्त्तिर्भगवान्हरिरीश्वरः १९ द्विजऋषभसएषब्रह्मयोनिः स्वयंदृक्स्वमहिमपरिपूर्णोमाययाचस्वयैतत् सृजतिहरतिपाती
त्याख्ययानावृताक्षोविवृतइवनिरुक्तस्तत्परैरात्मलभ्यः २० श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवी
र्य गोविंदगोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमंगलपाहिभृत्यान् २१ यइदंकल्यउत्थायमहापुरुषलक्षणं तच्चित्तः प्र
यतोजप्त्वाब्रह्मवेदगुहाशयं २२ शौनकउवाच शुकोयदाहभगवान्विष्णुरातायशृण्वते सौरोगणोमासिनानावसतिसप्तकः
तेषांनामानिकर्माणिसंयुक्तानामधीश्वरैः ब्रूहिनः श्रद्दधानानांव्यूहंसूर्यात्मनोहरेः २३ सूतउवाच अनाद्यविद्ययाविष्णोरात्मनः स एप
र्वदेहिनां निर्मितोलोकतंत्रोयंलोकेषुपरिवर्त्तते २४ एकएवहिलोकानांसूर्य्यआत्मादिकृद्धरिः सर्ववेदक्रियामूलमृषिभिर्ब १९
हुधोदितः २५ कालोदेशः क्रियाकर्त्ताकरणंकार्य्यमागमः द्रव्यंफलमितिब्रह्मन्नवधोक्तोऽजयाहरिः २६ मध्वादिषुद्वादशसुभ

गवान्कालरूपधृक् लोकतंत्रायचरतिपृथग्द्वादशभिर्गणैः २७ धाताकृतस्थलीहेतिर्वासुकीरथकृन्मुने पुलस्त्यस्तुंबुरुरितिमधुमासंन
यंत्यमी २८ अर्य्यमापुलहोथौजाः प्रहेतिःपुंजिकस्थली नारदः कच्छनीरश्चनयंत्येतेस्ममाधवं २९ मित्रोत्रिःपौरुषेयोथतक्षकोमेन
काहहाः रथस्वनइतिह्येतेशुक्रमासंनयंत्यमी ३० वशिष्ठोवरुणोरंभासहजन्यस्तथाहूहूः शुक्रश्चित्रस्वनश्चैवशुचिमासंनयंत
मी ३१ इंद्रोविश्वावसुः श्रोताएलापत्रस्तथांगिराः प्रम्लोचाराक्षसोवर्य्योनभोमासंनयंत्यमी ३२ विवस्वानुग्रसेनश्चव्याघ्रआसार
णोभृगुः अनुम्लोचाशंखपालोनभस्याख्यंनयंत्यमी ३३ पूषाधनंजयोवातः सुषेणः सुरुचिस्तथा घृताचीगौतमश्चेतितपोमासंन
यंत्यमी ३४ ऋतुर्वर्चाभरद्वाजः पर्जन्यःसेनजित्तथा विश्वएरावतश्चैवतपस्याख्यंनयंत्यमी ३५ अथांशुःकश्यपस्तार्क्ष्यऋतसेन
स्तथोर्वशी विद्युच्छत्रुर्महाशंखः सहोमासंनयंत्यमी ३६ भगः स्फूर्जोरिष्टनेमिरूर्णआयुश्चपंचमः कर्कोटकःपूर्वचित्तिःपुष्यमा
संनयंत्यमी ३७ त्वष्टाऋचीकतनयः कंबलाश्वतिलोत्तमा ब्रह्मापेतोथशतजिद्धृतराष्ट्रइषंभराः ३८ विष्णुरश्वतरोरंभासूर्य
वर्चाश्चसत्यजित् विश्वामित्रोमखापेतऊर्जमासंनयंत्यमी ३९ एताभगवतोविष्णोरादित्यस्यविभूतयः स्मरतांसंध्ययोर्नॄणांह

Indira Gandhi National
Centre for the Arts

भा॰द्वा॰ रंसंह्नोदिने दिने ४० द्वादशस्वपि मासेषु देवोसौ षड्भिरन्वितः चरन्समंतात्तनुते परत्रेह च सन्मतिं ४१ सामर्ग्यजुर्भिस्तल्लिंगैरृषयः संस्तुवंत्यमुं गंधर्वा
२७ स्तं प्रगायंति नृत्यंत्यप्सरसो ग्रतः ४२ उन्नह्यंति रथं नागा ग्रामण्यो रथयोजकाः चोदयंति रथं पृष्ठे नैरृता बलशालिनः ४३ वालखिल्याः सह
स्राणि ऋषयो ब्रह्मर्षयो मलाः पुरतो भिमुखं यांति स्तुवंति स्तुतिभिर्विभुं ४४ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः कल्पे कल्पे स्वमात्मा
नं व्यूह्य लोकानवत्यजः ४५ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां द्वादशस्कंधे आदित्यव्यूहएका
दशोध्यायः ११ सूत उवाच नमो धर्माय महते नमः कृष्णाय वेधसे ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् १ एतद्वः
कथितं विप्रा विष्णोश्चरितमद्भुतं भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं २ अत्र संकीर्त्यते साक्षात्सर्वपापहरो हरिः नाराय
णो हृषीकेशो भगवान्सात्वतांपतिः ३ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं भक्तियो राम:
गः समाख्यातो वैराग्यं च तदाश्रयं ४ पारीक्षितमुपाख्यानं नारदाख्यानमेव च प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः ५ शुकस्य ब्रह्म २९
र्षभस्य संवादश्च परीक्षितः योगधारणयोत्क्रांतिः संवादो नारदाजयोः ६ अवतारानुगीतं च सर्गः प्राधानिकोयतः विरादुद्भव

वादः तत्त्वे मैत्रेययोस्ततः ७ पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये ८ ततो ब्रह्मांडसंभूतिर्वै
राजः पुरुषोयतः कालस्य स्थूलसूक्ष्मस्य गतिः पद्मस्य संभवः ९ भुव उद्धरणे भोधेर्हिरण्याक्षवधो यथा ऊर्ध्वतिर्यगवाक्सर्गो रु
द्रसर्गस्तथैव च १० अर्द्धनारीनरस्याथ यतः स्वायंभुवो मनुः शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ११ संतानो धर्मपत्नीनां क
र्दमस्य प्रजापतेः १२ अवतारो हि देवस्य कपिलस्य महात्मनः देवहूत्याश्च संवादः कपिलेन च धीमता १३ नवब्रह्मसमुत्पत्ति
र्दक्षयज्ञविनाशनं ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः नारदस्य च संवादस्ततः प्रैयव्रतं द्विजाः नाभेस्ततो नुचरि
तमृषभस्य भरतस्य च १४ ततो द्वीपसमुद्रादिवर्षनद्युपवर्णनं ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः १५ दक्षजन्म प्रचेता
भ्यस्तत्पुत्रीणां च संततिः यतो देवासुरनरास्तिर्यङ्नगखगादयः १६ त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्चादितेर्द्विजाः दैत्येश्वर
स्य चरितं प्रह्लादस्य महात्मनः १७ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं मन्वंतरावताराश्च विष्णोर्हयशिरादयः १८ कौर्म्यं मा
त्स्यं नारसिंहं वामनं च जगत्पतेः क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां १९ देवासुरमहायुद्धं राजवंशानुकीर्त्तनं इक्ष्वाकु

Indira Gandhi National
Centre for the Arts

भा॰द्वा॰ जन्मद्रेराःसद्युम्नस्यमहात्मनः २० इलोपाख्यानमत्रोक्तंतोएपाख्यानमेवच सूर्य्यवंशानुकथनंशशादाद्यान्नगादयः २१ सौकन्यंचाथशर्य्या
२१ तेःककुत्स्थस्यचधीमतः खट्वांगस्यचमांधातुःसौभरेःसगरस्यच २२ रामस्यकोशलेंद्रस्यचरितंकिल्बिषापहं निमेरंगपरित्यागोजनका
नांचसंभवः २३ रामस्यभार्गवेंद्रस्यनिःक्षत्रीकरणंभुवः ऐलस्यसोमवंशस्ययातेर्नहुषस्यच २४ दौष्यंतेर्भरतस्यापिशांतनो
स्तत्सुतस्यच ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशोनुकीर्त्तितः यत्रावतीर्णोभगवान्कृष्णाख्योजगदीश्वरः २५ वसुदेवगृहेजन्म
ततोवृद्धिश्चगोकुले तस्यकर्माण्यपाराणिकीर्त्तितान्यसुरद्विषः २६ पूतनासुपयःपानंशकटोत्पाटनंशिशोः तृणावर्त्तस्य
निष्पेषस्तथैवबकवत्सयोः २७ धेनकस्यसहभ्रातुःप्रलंबस्यचसंक्षयः गोपानांचपरित्राणंदावाग्नेःपरिसर्पतः २८ दमनं
कालियस्याहेर्महाहेर्नंदमोक्षणं व्रतचर्य्यातुकन्यानांयत्रतुष्टोच्युतोव्रतैः २९ प्रसादोयज्ञपत्नीभ्योविप्राणांचानुतापनं एम॰
गोवर्द्धनोद्धरणंचशक्रस्यसुरभेरथ यज्ञाभिषेकंकृष्णस्यस्त्रीभिःक्रीडाचरात्रिषु ३० शंखचूडस्यदुर्बुद्धेर्वधोरिष्टस्यकेशि २१
नः ३१ अक्रूरागमनंपश्चात्प्रस्थानंरामकृष्णयोः व्रजस्त्रीणांविलापश्चमथुरालोकनंततः ३२ गजमुष्टिकचाणूरकंसा

दीनांचयोवधः मृतस्यानयनंसूनोःपुनःसांदीपनेर्गुरोः ३३ मथुरायांनिवसतायदुचक्रस्ययत्प्रियं कृतमुद्धवरामाभ्यांयुतेनहरिणाद्वि
ज ३४ जरासंधसमानीतसैन्यस्यबहुशोवधः घातनंयवनेंद्रस्यकुशस्थल्यानिवेशनं ३५ आदानंपारिजातस्यसुधर्मायाःसुराल
यात् रुक्मिण्याहरणंयुद्धेप्रमथ्यद्विषतोहरेः ३६ हरस्यजृंभणंयुद्धेबाणस्यभुजकृंतनं प्राग्ज्योतिषपतिंहत्वाकन्यानांहरणंचय
त् ३७ चैद्यपौंड्रकशाल्वानांदंतवक्रस्यदुर्मतेः शंबरोद्विविदःपीठोमुरःपंचजनादयः माहात्म्यंचवधस्तेषांवाराणस्याश्चदाहनं
३८ भारावतरणंभूमेर्निमित्तीकृत्यपांडवान् ३९ विप्रशापापदेशेनसंहारःस्वकुलस्यच उद्धवस्यचसंवादोवासुदेवस्यचा
द्भुतः यत्रात्मविद्याह्यखिलाप्रोक्ताकर्मविनिर्णयः ४० ततोमर्त्यपरित्यागआत्मयोगानुभावतः ४१ युगलक्षणवृत्तिश्चक
लौनृणामुपप्लवः चतुर्विधश्चप्रलयउत्पत्तिस्त्रिविधातथा ४२ देहत्यागश्चराजर्षेर्विष्णुरातस्यधीमतः शाखाप्रणयनमृषे
र्मार्कंडेयस्यसत्कथा ४३ महापुरुषविन्यासःसूर्यस्यजगदात्मनः ४४ इतिचोक्तंद्विजश्रेष्ठायत्पृष्टोहमिहास्मिवः लीलावता
रकर्माणिकीर्त्तितानीहसर्वशः ४५ पतितःस्खलितोवार्त्तःक्षुत्वावाविवशोब्रुवन् हरयेनमइत्युच्चैर्मुच्यतेसर्वपातकात् ४६ सं

Indira Gandhi National
Centre for the Arts

भा॰द्वा॰ कीर्त्यमानो भगवाननंतः श्रुतानुभावो व्यसनं हि पुंसां प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोर्कोभ्रमिवातिवातः ४७ मृषा गिरस्ता ह्यसतीरस
२२ त्कथा न कथ्यते यद्भगवानधोक्षजः तदेव सत्यं तदुहैव मंगलं तदेव पुण्यं भगवद्गुणोदयं तदेव रम्यं रुचिरं नवं नवं तदेव शश्व
न्मनसो महोत्सवं तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोनुगीयते ४८ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवि
त्रं प्रगृणीत कर्हिचित् तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोमलाः ४९ स वाग्विसर्गो जनताघविप्ल
वो यस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः ५० नैष्कर्म्यमप्यच्युतभा
ववर्जितं न शोभते ज्ञानमलं निरंजनं कुतः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यनुत्तमं ५१ यशः श्रियामेव परिश्रमः परो
वर्णाश्रमाचारतपःश्रुतादिषु अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ५२ अविस्मृतिः कृष्णपदारविंद एमः
योः क्षिणोत्यभद्राणि शमं तनोति च सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं ५३ यूयं द्विजाग्र्या बत भूरिभागा यच्छ २२
श्वदात्मन्यखिलात्मभूतं नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ५४ अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे परम

र्षिवक्त्रात् प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वतां ५५ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः माहात्म्यं वासु
देवस्य सर्वाशुभविनाशनं ५६ य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेव सः ५७ द्वा
दश्यामेकादश्यां वा शृण्वन्नायुष्यवान्भवेत् पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ५८ पुष्करे मथुरायां च द्वारवत्यां यतात्मवा
न् उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ५९ देवता मुनयः सिद्धाः पितरो मनवो नृपाः यच्छंति कामान्गृणतः श्रृण्वतो यस्य कीर्त
र्तिताः ६० ऋचो यजूंषि सामानि द्विजोधीत्यानुविंदते मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं पुराणसंहितामेतामधीत्य
प्रयतो द्विजाः प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६१ विप्रोधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलां वैश्यो निधिपतित्वं च शूद्रः
शुध्येत पातकात् ६२ कलिमलसंहतिकालनोखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं इह तु पुनर्भगवानशेषमूर्तिः परिपठितो
नुपदं कथाप्रसंगैः ६३ तमहमजमनंतमात्मतत्वं जगदुदयस्थितिसंयमात्मशक्तिं द्युपतिभिरजशक्रशंकराद्यैर्दुरवसितस्तवम
च्युतं नतोस्मि ६४ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजंगमालयाय भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय

Indira Gandhi National
Centre for the Arts

भा०१२ नमः सनातनाय ६५ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोप्यजितरुचिरलीलाकृष्टसारस्तदीयं व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखि
२३ लवृजिनघ्नं व्याससूनुं नतोस्मि ६६

नेदिष्ठैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ध्यानावस्थि
ततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः १ पृष्ठे भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडू
यनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पांतु वः यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनांभसां यातायातमतंद्रितं
जलनिधेर्नाद्यापि विश्राम्यति २ पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ३ ब्राह्मं
दशसहस्राणि पाद्मं पंचोनषष्टि च श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकं ४ दशाष्टौ श्रीभागवतं नारदं पंचविंशतिः मार्कंडेयं ए०भा
नवाग्नेयं च दश पंच चतुःशतं चतुर्दश भविष्यं स्यात्तथा पंचशतानि च दशाष्टौ ब्रह्मवैवर्तं लिंगमेकादशैव तु ६ चतुर्विंशतिवा २३
राहमेकाशीतिसहस्रकं स्कांदं शतं तथा चैकं वामनं दश कीर्तितं ७ कौर्मं सप्तदशाख्यातं मात्स्यं तच्च चतुर्दश एकोनविंशत्सौ

पर्णं ब्रह्मांडं द्वादशैव तु ८ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ९ इदं भगवता पूर्वं ब्रह्मणो
नाभिपंकजे स्थिताय भवभीताय कारुण्यात्संप्रकाशितं आदिमध्यावसानेषु वैराग्याख्यानसंयुतं हरिलीलाकथाव्रातामृतानंदि
तसत्सुरं सर्ववेदांतसारं यद्ब्रह्मात्मैकत्वलक्षणं वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनं १० प्रौष्ठपद्यां पौर्णमास्यां हेमसिंह
समन्वितं ददाति यो भागवतं स याति परमां गतिं ११ राजंते तावदन्यानि पुराणानि सतां गणे यावन्न दृश्यते साक्षाच्छ्रीमद्भा
गवतं परं १२ सर्ववेदांतसारं हि श्रीमद्भागवतमिष्यते तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् १३ निम्नगानां यथा गं
गा देवानामच्युतो यथा वैष्णवानां यथा शंभुः पुराणानामिदं तथा १४ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा त
था पुराणव्रातानां श्रीमद्भागवतं द्विजाः श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं
परं गीयते यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः १५ कस्मै येन
विभासितोयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा योगींद्राय तदात्मनाथ भगवद्राताय कारु

Indira Gandhi National Centre for the Arts

भा॰द्वा॰ रूपतस्तच्छुद्धंविमलंविशोकममृतंसत्यंपरंधीमहि १९ नमस्तस्मैभगवतेवासुदेवायसाक्षिणे यइदंकृपयाकस्मैव्याचचक्षेमुमुक्षवे
१२५ २० योगीन्द्रायनमस्तस्मैशुकायब्रह्मरूपिणे संसारसर्पसंदष्टंयोविष्णुरातममूमुचत् २१

॥समाप्तं॥
॥२५॥